लितं प्रदीप्ते रागाग्नौ घननिविडमाश्लिष्यति वधूं प्रतीकारं व्याधेः सुखमिति विपर्यस
त्यिज्जनः ९१ एते भर्तृहरेः इति श्री· विषयोपहासपरिच्छेदः १४२ अथ पश्चात्तापः ·
भोगा न भुक्ता वयमेव भुक्ता तपो न तप्ता वयमेव तप्ताः तृष्णा न जीर्णा वयमेव जीर्णा।
कालो न यातो वयमेव याताः १ नाभ्यस्ता भुवि वादिवृन्ददमनी विद्या विनीतोचि
ता खड्गाग्रैः करिकुंभपीठदलनैर्नाकं न नीतं यशः कान्ताकोमलपल्लवाधररसः
पीतो न चंद्रोदये तारुण्यं गतमेव निष्फलमहो शून्यालये दीपवत् २ न ध्यातं पद
मीश्वरस्य विधिवत्संसारविच्छित्तये स्वर्गद्वारकपाटपाटनपटुर्धर्मोऽपि नोपार्जितः
नारीपीनपयोधरोरुयुगलं स्वप्नेऽपि नालिंगितं मातुः केवलमेव यौवनवनच्छेदे कु
ठारा वयं ३ क्षान्तं न क्षमया गृहोचितसुखं त्यक्तं न संतोषतः सोढा दुःसहशीत
वाततपनक्लेशा न तप्तं तपः ध्यातं वित्तमहर्निशं नियमितैः प्राणैर्न शंभोः पदं।

२६१

नतत्कर्मंकृतंयदेवमुनिभिस्तैस्तैःफलैर्वंचितं ४ जातःकूर्मःपृथुभवनभरायार्पितंये।
नपृष्टंश्लाघ्यंजन्मध्रुवस्यभ्रमतिनियमितंयइतेजस्विचक्रंसंजातव्यर्थयक्षापरहित।
करणेनोपरिष्टान्नचाधोब्रह्मांडोदुंबरांतर्मशकवदपरेजंतवोजातनष्टाः ५ धन्या।
नांगिरिकंदरेनिवसतांज्योतिःपरंध्यायतांआनंदाश्रुजलंपिबंतिशकुनानिःशंकमें।
कस्थिताः अस्माकंतुमनोरथोपरचितप्रासादतपीतटक्रीडाकाननकेलिकौतुक।
ज्जुषामायुःपरंक्षीयते ६ अज्ञानन्माहात्म्यंपततिशलभस्तीव्रदहनेसमीनोप्यज्ञा।
नाद्बडिशयुतमश्नातिपिशितं विजानंतोप्येवंवयमिहविपज्जालजटिलान्नमुंचामःका।
मानहहगहनोमोहमहिमा ७ पतेभर्तृहरेः ततत्स्वबलहस्मेतकिमिवास्मिन्वृथ।
तले मयानकृतमत्रेनपश्चात्तापाभिवृद्धये ८ मंत्रोज्ञाविततेदेवतेनैविधिवदासीत्का।
ताःसिद्धयोयोगाभ्यासमसमाहितेवतुदिनंतीर्णोनमोहार्णवः दृष्ट्वात्वइतवेदंदत
विगलत्सपल्लवेलासितेदिग्मूढैरिवपंडितैरपिबलात्कालःकथंनीयते ९ धा
विन्बाहसमाहितेनमनसाहरेर्गिरोनामितंभूपानांप्रतिगाहकेविवर्चितंप्रोद्धुष्टमिह

वचः ह्वाराध्यक्षनियंत्रणापरिभवप्रम्लानवक्त्रैः स्थितं भ्रांतः किंकरवाम मुंचति मनो ना
प्याप्यविद्यारहे ९ एतौ श्रीदेवगणदेवानां यांतं यौवनमधुना वनमधुना वनमधु।
नाशरणमेकमस्माकं स्फुरडुरुहारमणीनां हारमणीनां गतः कालः ११ गात्रं सं
कुचितं गतिर्विगलिता दंताश्च नाशं गताः दृष्टिर्भ्रश्यति रूपमेव हसते वक्त्रं च लालायते।
ते वाक्यं नैव करोति बांधवजनः पत्नी न शुश्रूयते हा कष्टं जरयाभिभूतपुरुषैः पु
त्रैरवज्ञायते १२ नो धर्मायतनो न तत्रनिरतानार्थीयपतेद्दर्शः कामोर्थोयवनंत
दर्थमपि तो मोहः क्वचित्कस्यचित् तत्किं नाम वयं हहैव वचादिता ज्ञानेश्वनः कारणाज्जी
वंतोपि मृता इति प्रवदतां याह्यार्थसंसिद्धये १३ केषामप्येते इति शा॰ पश्चात्तापपरि
च्छेदः १५४ अथ कालचरितं पुरंदरसहस्राणि चक्रवर्तिशतानि च निर्वापिता
नि कालेन प्रदीपा इव वायुना १ भ्रातः कष्टमहो महान्स नृपतिः सामंतचक्रं च
तत्पार्श्वे तस्य च सा विदग्धपरिषत्ताश्चंद्रबिंबाननाः उद्वृत्तः स च राजपुत्रनिवहस्ते
वंदिनस्ताः कथाः सर्वं यस्य वशाद्गतं स्मृतिपथं कालाय तस्मै नमः २ प्रामाजरा

यौवनमप्यनीतं वृथायसेतं परमार्थसिद्धौ आयुर्गतप्रायमिदं यतो मे विश्रम्य न याति।
कालः ३ एतो भर्तृहरेः कांश्चित्कलयानं कृतस्थितिर्यावज्जन्तून्दिनानां शान्ते ता।
त्वाक्कर्मभिरात्मनः प्रतिदिनं संनीयमाना मुधा कालोयं कवलीकरोति सकलान्भ्रा:
तः कृतः कौशलं ४ कालेन त्वतितिवा विवर्कि यवनव्योमादि शुक्तं जगद्भुलाधाश्चवः
राः प्रयान्ति विलयं विश्वो विचारादिति एषणामोपि विनश्यन्तो नवनवं लोकान्तनेकान्भु
था मायामोहमयी भवभ्रमणा यीनी नास्थाजहिमो वयं ५ एतो शार्ङ्ग:धरस्य अप्येवहः
सितं गीतं पठितं येः शरीरिभिः अप्येवतेनहर्ष्याने कष्टं कालस्य चेष्टितं ६ म्रियमाणं
मृतं बंधुं शोचंति परिदेविनः आत्मानं नानुशोचंति कालेन कवलीकृतं ७ श्रीदेवा।
गणानां आराध्य भूपतिमवाप्य ततो धनानि भुंजामहे वयमिह प्रसभं सुखानि इत्था।
शया वत विमोहितमानसानां कालो जगाम मरणावधिरेव पुंसां ८ इति शा० काल
चरित वर्णनं परिच्छेदः १४५ अथ विचारः यस्मिन्वस्तुनि ममता मम तापस्तत्रैव
यत्रैवाहमुदासीनस्तत्र मुदा मे स्वभाव संतुष्टः मृत्योर्बिभेषि किं मूढ भीतं मुञ्चति किं यमः

अज्ञातेनैव सटहृणातिक्रकयन्नमजन्मने १ कस्यापि मुंडीजटीवल्कलवांश्चदंडीकषा
यवासाव्रतकर्षितांगः सकोहिकोवायदिनामनत्वस्तत्तात्रतस्योभयमेवनष्टं २ अधी
तचतुरोवेदान्व्याकरणाण्यष्टदशासमृती अहोश्रमस्यैवफलंस्मात्मापिकलितोनचेत् ३।
पतोहरिगणास्य जडास्तपोभिःश्रमयंतिदेहंतुधामनश्चापिविकारहेतुं स्वाधुक्तमस्ते·
दधातीतिकोपाङ्गोन्याकारशुद्धिश्यापहिनास्तिसिंहः ४ कस्यापि बालिकारचितवा
लुकत्रिकाक्रीडनेनसहधांतदर्पने यत्रशाम्यतिमनोननिर्मलस्फीतविजलधिमज्ज
नामलं ५ अग्रेगीतंसरसकवयःपार्श्वतोदाक्षिणात्याः पृष्ठेलीलावलयरणितंचा
मरग्राहिणीनो यद्यस्त्येवंकुरुभवरसास्वादनेलंपटत्वंनोचेच्चेतःप्रविशसहसा।
निर्विकल्पेसमाधौ ६ यदाकिंचिज्ञोहंद्विपइवमदांधःसमभवंतदासर्वज्ञोस्मीत्य
भवदवलिप्तंममनः यदाकिंचित्किंचिद्बुधजनसकाशादवगतंतदामूर्खोस्मी·
तिज्वरइवमदोमेविगलितः ७ मानेम्लायिनिखंडितेचवसुनिव्यर्थेप्रयातेर्थि·
निक्षीणेबंधुजनेगतेपरिजनेनष्टेशनैर्यौवने युक्तंकेवलमेतदेवविदुषांयज्ञा।

कुकन्यापयः पूतयावगिरीन्द्रकंदरदरीकुंजे निवासः क्वचित् ८ इतिशा० यत्र विरचि
तायां विचारपरिच्छेदः २४६ अथोपदेशाः सवेदो निर्वेदः स्मृतिरपि च सा विस्मृतिर०
होस शास्त्रार्थो बाधः तदपि यजनं मोहभजनं सकृद्धः प्रत्यूहो हरिहरिकथा सा त ।
वितथा न यत्र स्पादात्मा स्फुरदनुभवप्रत्ययमयः १ कस्यापि कालेमहति जातेन श्रा०
मनः श्रेयस्कृता आत्मज्ञानेश्रमः कार्यो यज्ज्ञात्वामृतमश्नुते २ शंभुकृष्णः कथामेवं
शिवशक्त्योर्लयेयेवच यः शृणोति नरो भक्त्यानिष्पापः सोपिजायते ३ सगुणी सर्वथ
मिष्टः सविवेकी सबुद्धिमान् बलसत्तानेन मर्यस्पपोषाः पशुसमानराः ४ यामेगा।
स्यवरौष्ट्राघाकानेन हरिणादयः यथैते पशवो मूढास्तथात्मानेन वेत्ति यः ५ सर्वे
षां तु पदार्थानां अभ्यासः कारणं परं अनभ्यासेन मर्त्यस्य योगः प्राप्तोपि नश्यति ६ अ०
भ्यासेनास्थिरं चित्तं अभ्यासेनानिलच्युतिः अभ्यासेन परानंदः अभ्यासेनात्मदर्शनं ७ अ०
भ्यासेनान्यसंचारे अभ्यासेनान्यरूपता अभ्यासेन समुत्क्रांतिरभ्यासेनाणिमादयः
श्रुत्वापि यदनभ्यासो लोहेति श्राज्ञजनेरतिः विरुद्धशास्त्रश्रवणमेतद्योगविनाशनं ०

शा
२६४
264

असत्संगो गुणज्ञोपि विषयासक्तमानसः अकस्मात्प्रलयं याति गीतरक्तो यथा मृगः ८ वि-
षयेष्वपि कष्टोयं विषये वनिताभिधः जीवन्मृतैः किलाकृष्टः स्त्रियः कृष्टेन जीवति ९
स्त्रीरत्नध्यानमात्रेण ब्रह्मज्ञोपि मनो हरेत् किं पुनस्त्वितरेषां तु विषयेच्छानुवर्तिनां १०
स्त्रीरत्नं मोहनं स्पष्टं दृष्टमाशीविषोपमं यदीच्छेदात्मनः श्रेयो मनसापि न चिंतयेत् ११
एते योगरसायनात् संसारतनवड्घोरपदवीं न दवीयसी अंतरायास्त्वरा नस्युर्यदिमे मदि-
रेक्षणाः १२ संगः सर्वात्मना त्याज्यः स चेत्त्यक्तुं न शक्यते महद्भिः सह कर्तव्यः सैव
तस्य हि भेषजं १३ एतौ मदालसायाः मोक्षद्वारे प्रतीहाराश्चत्वारः परिकीर्तिताः शा-
मो विवेकः संतोषश्चतुर्थः साधुसंगमः १४ वासनाद्विविधा प्रोक्ता शुद्धाति मलिना
तथा शुद्धा जन्मक्षये हेतु -- मलिना तथा शुद्धा जन्मक्षये हेतुर्मलिना जन्मकार।
णं शुभाशुभाभ्यां मार्गाभ्यां वहंती वासनां सरित् पौरुषेण प्रयत्नेन योजनीया शु-
भे पथि १६ न तदस्ति जगत्कोशे शुभकर्मानुपातिना यत्पौरुषेण शुद्धेन न समा-
साद्यते जनैः १७ शुभवासनया चेतो महत्याज्या यते महत् आत्मानं चिंतयन्द्वंद्वनेही।

रुद्रत्वमागतः १८ रुद्रवासनयाचेतः रुद्रनामेति नित्यशः पिशाचविभ्रमात्स्पष्टः
पिशाचान्निशि पश्यति १९ महातिशाययुक्तेन विश्वामित्रेण विश्रुता भूयोभूयः प्रयत्ने
नद्भः प्राप्ता तपसोर्जिता २० प्रापयेनमयं जित्वा कृत्वा वचनसंगरं परलोका उपा
नीतः सा विद्या सत्यवानपि २१ नमोस्तु तिशायो लोकेयस्याक्लिन्नफलोदयः प्र
नः कार्यः प्रसन्नस्त्वं सद्भिः शिवफलाप्तये २२ पुत्र्यासं — सतोज्ञस्य संसारो मोक्षदा
यते हृत्संस्यक्तयुक्तस्त्वमहागाधार्णवोपमः २३ त्वमनन्तं समस्तांगं प्रशमान्त्र
तवर्मणा वेधयंति नद्भः स्वानिशिताचग्रशिलामिव २४ पुंसा निजमनोमोहः कः
ल्पितो नलप्तद्भः स्वदः संसारविषवेताला विवा वैगो वलीयते २५ विचारदर्पणे लग्ना
चिंत्ये धैर्य्यरंगता श्रायया न विलंपति वा ताम्रिचलतामिव २६ यथोदिते दिवाना
था क्वापि याति नमस्विनी तथाविवेकी भ्युदिते क्वापि विद्या विलीयते नाहं मांस
न चास्थीनि देहादन्यः परोस्म्यहं इति निश्चितवानन्तः क्षीणा विद्यस्त्वावते २७ सा
र्वहृष्टीः परिमज्य नियम्य मनमामनः सबाह्याभ्यन्तरार्थस्य संकल्पस्य तं त्यजेत् ॥

यदिवर्षसहस्राणितपश्चरसिदारुणं तथापितेनसिद्धिःस्यात्संकल्पोपशमादृते ३०
हरोयद्यपदेष्टास्याद्धरिःकमलजोपिवा तथापितेनैवमुक्तिःसंकल्पोपशमादृते ३१
संकल्पतंतावखिलाःप्रोताभावाःशुभाशुभाः छिन्नेतंतौनजानीमःक्वयांतिविशा-
रदः ३२ शांतसंदेहदौरात्म्यंगतकौतुकविभ्रमं परिपूर्णांतरंचेतःपूर्णेंदुरिवराजते
चेतश्चंचलयावृत्याचिन्तानियतपंजरे धृतिंबध्नातिनैकत्रपंजरेकेसरीयथा ३४ ह
ष्टमात्रेषुभावेषुयथाबालेनरुध्यते तथैवतदनध्यानस्थिरंचित्तेनरुध्यते ३५ घटा-
त्पटमुपायातिपटाकंकुकमुत्कटं चित्तमर्थेषुचरतिपादपेष्विवकर्मटः ३६।
सफलोनांसदेहस्यनकाश्चित्तकणक्रमः मनोदेहस्यसफलंसर्वमेवस्वचेष्टितं ३७
मनोनिर्माणमात्रंराजंजगज्ञाम्नामहार्थिना स्वक्तनानेनचार्थःस्यात्कउदारोमहा-
मनः ३८ मनोमात्रंजगत्सर्वंमनःपर्वतमंडलं मनोभूमिर्मनोव्योममनोवायु-
र्मनोजलं ३९ ऊर्ध्वमोल्लासिधम्मिल्लाहेलावलितलोचनाः काष्ठकुड्योपमाःसो-
पिलग्नाथमनसोगना ४० कल्पांतपवनावांतुयांतुचैकत्वमर्णवाः तपंतुद्वाद-

शादित्यानास्तिनिर्मनसः स्तुतिः ४१ शास्त्रसत्संगाभ्यां वैराग्याच्चिंतानममतापितं छिंधि
त्वमयत्नेनैवायो मनसैव मनोधुना ४२ वासनावायुनाकृष्टो मनोहरिणको न्नृणां परि
विवशतामेति संसारवनगुल्मके ४३ संततोदारवृत्तान्तकथाभ्यासपरिशीलितं सं
यत्नं निर्मलं चेतो मोहपंकैर्न लिप्यते ४४ एतेन वसिष्ठात् श्रुत्वैकं जगत्यस्मिन्नास्थि
मांसास्थिनिर्मितं कर्मभिर्निर्मितं महायामं सर्वतः स्नायुवेष्टितं नवद्वारं महाभूतैः पंच
भिः सर्वतोवृतं नृपस्त्वत्र कथं तत्र चेतनावान्व्यवस्थिता ४६ मंत्रिणो न समबुद्धिर्भव
विरोधिनो यत्नेनैतस्य नाशाय तानुभाविनवेनरं ४७ नृपस्य तस्य चत्वारो नाशामि
त्रेति विद्विषः कामः क्रोधस्तथा लोभो मोहश्चान्यो महारिपुः ४८ यदात्वसत्
पत्नानि द्वाराण्यावृत्य तिष्ठति तदास्य स्थबलैश्चैव निरातंकस्य जायते ४९ एते
मार्कंडेयात् जयन्नविंद्रनात्वमानियंतिः परमात्मनः यद्वशादिदमाभाति जगच्च
कं प्रवर्तते ५० यस्सर्वात्मको देवः परं ब्रह्म महेश्वरः स्वच्छः स्वानुभवानंदरूपः
पोन्नादिविवर्जितः ५१ एतस्मात्परमानंदात्कुन्दविन्मात्ररूपिणः जीवः संज्ञा

या
२६६
266

यतेपूर्वंतस्माच्चिद्वंततोजगत् ५२ स्वाभाविकंयतस्फुरणादियोऽन्तःसोंगजीवकः ५३
यथावातास्यचलनंकृशानोकस्मतायथा शीततापितुषारस्यतथाजीवत्वमात्मनः
जीवत्वाच्चित्तसंवित्त्वंचित्तनादिंद्रियादिकं इंद्रियादेःशरीरत्वंशरीरात्कर्मसंचयः ।
कर्मणःसंचयात्स्वर्गनरकौमोक्षबंधने कर्मणोजायतेजंतुर्बीजादिव वांकुरः ५६
जंतोःप्रवर्ततेकर्मपुनर्बीजमिवांकुरात् आदिसर्गोहिनियतिर्भाववैचित्र्यमक्षयं
अनेनेत्थंसदाभाव्यमितिसंपद्यतेपरं अंतःकीर्णायथापंकेपुत्रिकावाथदारुणि ।
वर्णायथाम– कल्केसर्वेसंगीतायापरे ५८ कटुकत्वंयथाकुहेमन्नलंवगात्वए-
यज्जलात् यथानसंभवत्येवंनजगत्स्थगीश्वरात् ५९ नापएवयथावारिमृ-
गाणांभ्रमकारणं असत्यमेवसत्याभंतथामूढमतेर्जगत् ६० नाकिंचित्केनचि-
त्तामनचकिंचित्कचित्स्थितं चिदाकाशमनंशांतंसर्वमेतदमितिमत् ६१ मुधैवै-
तेवयमहोसत्वराहरमानवाः असत्याएवजानीमोयामश्चायामएवच ६२ ।
अलीकएवमज्जावोभावस्तेलोकएवच अनुभूताप्यसद्रूपःस्वप्नेस्वमरणंयथा ।

शरीरातीतवृत्तिस्त्वं शरीरस्थोभवाभव: मागा: शोकं च हर्षं च तत्र मात्माविगतज्वर: ।
यथा रजोभिर्गगनं यथा कमलमंबुभि न लिप्यते तिसंश्लिष्टैर्देहैरात्मा तथैव च ६५
वह्नि: कृत्रिमसंरंभोरूढ्दिसंरंभवर्जित: कर्ता बहिरकर्तांतर्लोके विहर राघव ।
देशाद्देशं गते चित्ते मध्ये यच्चेतनं सो वपु: अजाड्यसंविन्मननं तन्मयो भव राघव ६७ ।
प्रशांत: शांतसंकल्पो धीरधीर्दूर्विनाशय: यथाप्राप्तानुवर्ती च लोके विहर रा।
घव ६८ भूयतां ज्ञानसर्वस्वं श्रुत्वा चैवावधार्यतां भोगेच्छामात्रको बंधस्तत्त्यागो
मोक्ष उच्यते ६९ शमा: ज्ञानदशामेतां पश्यन्नेवाद्वयोपि यै स देहा वाप्यदेहो वै ने·
मुक्तानात्र संशय: ७० यच्चस्तिमितगंभीरं तेजो न तमसस्ततं अनाख्यमनभिव्य·
क्तं न तेज: परमात्मकं ७१ नेंद्रियाणि न वा रूपं न मन: परिकल्पना यत्सर्वं न च
यत्सर्वं तद्रूपं पारमार्थिकं ७२ परमाणोरपि परं तदणीयो ह्यणीयस: शुद्धं सू·
क्ष्मं परं शांतं तदाकाशोदरादपि ७३ एतद्ब्रह्म परममेतत्तत्सत्त्वमं पदं एषा गति
विरक्तानामेषोसौ परमा: शिव: ७४ एते श्रीवासिष्ठात् इति श्रीशा· वीरवसेश्च ।

श्री
१८०
267

प्रदेशविधानं परिच्छेदः १८७ अथ कालसंख्या षड्भिः प्राणैः पलं प्रोक्तं षष्ट्या च घटि
का च तैः षष्ट्या च घटिकाभिः स्यादहोरात्रं तु मानवे १ दिनैः पंचदशैः पक्षः शुक्लः
कृष्णश्च गीयते पक्षद्वयेन मासः स्यात् पितॄणां तदहर्निशं २ ऋतुस्तु मासयुग्मेन वर्षस्या
त्त्वयनं स्मृतं अथ नृणां हि यद्वर्षं देवानां वासरो निशा ३ तद्द्वात्रिंशत्सहस्रैस्तैर्लक्षैश्चतुः
लक्षैः कलिः स्मृतः शेषं युगत्रयं त्वेतत्कलेर्द्वित्रिचतुर्गुणं ४ खचतुष्करदा वेदा अष्टा
तद्युगमुदाहृतं चतुर्युगैकसप्तत्या मन्वन्तरमुदाहृतं ५ चतुर्भिर्वृंदैः कल्प-
द्वात्रिंशद्भिश्च कोटिभिः चतुर्दशमनुवैश्चाद्यपतंति ब्रह्मणोहनि ६ चतुर्युगसहस्रा
त्मकः कल्पाख्यं ब्रह्मणो दिनं तन्मानेन तथा रात्रिः सृष्टिसंहारकारिणी ७
अथ कालाग्निरुद्रस्य तृतीयनयनोत्थिता ज्वाला दहति तत्सर्वं निशायां ब्रह्मणो
यतः स्वपतो ब्रह्मणः सदा भूमिरेकार्णवीभवेत् निःश्वासैः सृज्यते सापि सृज्ये
त्यमोत्थितः पुनः ८ स्वकालपरिमाणेन शतवर्षायते किल ब्रह्मादीनां तथा श-
केः तयो यन पुनः पुनः ९ ब्रह्मा हरिर्हरो रुद्र ईश्वरो लीयते ह्यस्मिन् ईशः सदाशिवः।

वेसोपिशक्तोशक्तिःपरेशिवे ११ पुनःसृष्टिःपुनर्नाशःपुनःकल्पपरंपरा पुनःपु-
नरिदंसर्वंचक्रवत्परिवर्तते १२ येतत्रलीनाःपरमेपदेशिवेमुक्तिंगतादेवितएववना
परे शक्तिप्रणाशोप्रलयेमहत्यहोतेषांकदाचित्पतनंनविद्यते १३ शिवभाषितयो
गरसाधनात् इतिश्रा· पत्रविवचितायांपञ्चमोकालसंख्यानेपरिच्छेदः १४८ अथशा·
रीरे शक्तिकारणमव्यक्तंसर्वव्यापिपरात्परं सान्निध्यादपिडर्यासुविश्वमूर्त्योपलक्षि।
ते १ नाकारेणनिराकारेणनस्त्रीपुनपुंसकं नांभस्तेजोमरुद्व्योमभूमिर्हरेनवा।
तिके २ ततोनिष्कलदेवस्यशक्तिरिच्छेतिजायते चिद्रूपिण्यातयाक्रीडांकर्तुमै।
च्छल्लीलया ३ क्रियारूपागुणमयीतस्याबुद्धिरजायत ज्ञानशक्तिरितिख्याता।
क्रियाशक्तिश्चसासृता ४ पुरुषरहितनश्चितशक्तिस्तस्याःसदाशिवः नमोरूपस्ततो
वायुरीश्वरःसमजायत ५ ईश्वरात्समभूद्रुद्रोज्योतिर्मयउमापतिः रुद्राद्विष्णुरभू·
द्यत्रैलोक्यपरिपालकः ६ विष्णुनाभ्यब्जतोब्रह्माब्रह्माण्डपृथिवीमयः तदर्थे।
मभवत्सर्वंब्रह्माण्डकनकप्रभं ७ तेनसृष्टंस्वशक्त्येदंत्रैलोक्यंसचराचरं पंचभिःस·

हृत्संभूयपंचभूतमयात्मके: ८ ततो ब्रह्माद्विधाभूतः शिवशक्तिविभागतः स्त्रीपुं
साविति सोऽभ्यार्द्धस्वरेवेनासृजत प्रजाः ९ ततस्तन्मुखस्यास्य दशपुत्रा मनोभवाः
तेषां दशस्वयेका कन्या मनोजाता प्रजापतिः १० ते सर्वे ज्ञाननिरताः हृत्संपुष्ट्यात्तपो-
धनाः तेषां पुत्रैश्च पौत्रैश्च व्याप्तं सर्वमिदं जगत् ११ ततश्चात्मभवः पुत्रो मरीचिरिति
यो भवत् दशपुत्रेषु विख्यातस्तस्माज्जातश्च कश्यपः १२ सोऽपि दत्तस्य कन्यासु क-
श्यपः समजीजनत् उत्पत्तिहेतुर्विश्वस्य भूतग्रामाश्चतुर्दश १३ तेजसा देवकार्ये-
षु वधूवु समधातवः अन्येषामपि कार्येषु पार्थिवः समधातवः १४ अष्टधा देवता-
योनिस्तिर्यग्योनिश्च पंचधा एकधा मानुषी योनिर्विमिश्रा भूताश्चतुर्दश १५ सर्वे मि-
थुनरूपेण प्रजा उत्पादयन्ति ते मैथुनानन्दनिरता विषयासक्तचेतसः १६ भग-
स्त्रैवेस्त्रवी शक्तिर्लिंगरूपी सदाशिवः उभयोर्योगतो बीजं ब्रह्मरूपं प्रवर्तते १७
गर्भाशयो धरापीठं रजो रक्तं च भास्करः सोमं रेतो ब्रह्मरूपं तस्मिंस्तत्र विलंबते १८
सूर्याचंद्रमसोर्योगाममावास्यां विदुर्बुधाः तस्यां प्रजा प्रजायते यदीच्छा परमेश्वरी

शुक्रशोणितसंयोगोयद्देवकिलजायते तदासंजायतेजीवोवह्निस्सूर्यात्समणोर्य
था २० शुक्रेधिकेभवेत्पुत्रः कन्यारक्ताधिकेभवेत् नपुंसकंसमत्वेन कर्मतोनिय
तिर्यथा २१ अंगप्रत्यंगभागास्ततः पिंडेप्रजायते चर्मरोमास्थिकादिताः सप्तधातवःस्व
रक्तक्रमात् २२ पिंडेमज्जाहस्राणिनामसंख्यापष्टिः शतेवास्थिभिः द्वासप्ततिसहस्रा।
भिर्नाडीभिःपंजरंकृतं २३ क्रियाशक्त्याविनाकापिज्ञानशक्तिर्नदृश्यते तेनदेवा।
नशक्तयर्थकृतंवेश्मक्रियामयं २४ चतुर्विंशतितत्त्वैः क्रियाशक्तिरचेतना सा·
नशक्ताप्यनाचापिलब्धातेचेतनावती सर्वज्ञोपिशिवस्तत्रशक्तिसंगेनमोहितः ना·
त्मानंनपरंवेत्तिविचेष्टतितदिच्छया प्राणापानमयीशक्तिः षट्चक्राधारसंयुता ·
शांतंशिववशीकृत्यवर्त्ततेकामकारतः २७ आधारकंदमित्युक्तंस्वाधिष्टानचजन्म·
भूः नाभिस्तुमणिपूराख्यंहृदयेविद्धिनाहतं २८ विशुद्धंकंठदेशस्थमाज्ञाचक्रंभ्रु·
वोंतरे आधारोहिचतुर्भिन्नः स्वाधिष्ठानंचषड्दलैः २९ दशभिर्मणिपूराख्यंहाद·
शभिस्त्वनाहतं विशुद्धंषोडशैर्भिन्नमाज्ञाचक्रद्वयंतत्र ३० कालाग्निरुद्रआधारो।

शा
२६५
269

शक्तिःकुंडलिनीतथा आनंदाख्यास्वाधिष्ठानेप्यात्माकामाख्ययामहः ३१ नाभौब्रह्मा
हृदिश्रीशःकंठेरुद्रोव्यवस्थितः ईश्वरोलंबिकायांचतदूर्ध्वेचसदाशिवः ज्योतिःस्था
नानिचैतानिषट्चक्राणिजयद्बुधाः नासामूलंबिंडस्थानंनादस्योत्पत्तिकारणं ३२।
तस्याधायोगिनीचक्रंतदूर्ध्वेशक्तिवास्थिता शक्तूर्ध्वेतुशिवोज्ञेयाशिवांतेधूमसंभवः
तमसोंतेपरंज्योतिर्बलहाःपरमेश्वरः यंदृष्ट्वाविलीयंतेयोगिनःस्थिरचेतसः ३४
चराचरेषुपिंडस्थंपदस्थंखानिलादिषु भास्करादिषुरूपस्थंरूपातीतंपरंविंडः हा
सप्ततिसहस्राणिकंदान्नाड्योविनिर्गताः प्रविश्यनाभिदेशात्तुसर्वांगेषुततोगताः
इडाचपिंगलाचैवसुषुम्णाचसरस्वती ३७ गांधारीहस्तिजिकाचपूषाचैवनिगद्यते
अलंबुसाकुहूश्चैवशंखिनीदशमीमता ३८ एताःप्राणवहाज्ञेयाःप्रधानादशना
डिका इडानासापुटेवामेपिंगलादक्षिणेभवेत् ३९ सुषुम्णातालुभित्त्वैवब्रह्म
द्वारंप्रवर्तिता सरस्वतीचजिकायांगांधारीवामकर्णके ४० दक्षिणेहस्तजिकास्या
त्पूषावामेचलोचने अलंबुसादक्षिणस्याद्गुदद्वारेकुहूर्भवेत् ४१ आब्रह्मरंध्रात्मा

२६५

गैणब्रह्मदंडसंशोधिनी प्राणोपानःसमानश्चउदानोव्यानएवच नागःकूर्मश्चकृक
करोदेवदत्तोधनंजयः ४३ प्राणोहिदशधाख्येषदशानामाद्यवायवः ह्यासमतिसा
हृत्वाष्टनाडीषुविचरत्यले ४५ हृदिप्राणोगुदेपानःसमानोनाभिसंगतः उदानः
कंठदेशस्थःव्यानःसर्वशरीरगः सर्गगमोटकोनागःकूर्मउन्मेषकारकः कृक
रस्याहारकरोदेवदत्तस्तुजृंभकः ४७ धनंजयोनादकरःस्यादेवंदशधामरुत् ये
नजीवतिजीवोयंनिर्जीवोयद्विनाभवेत् ४८ सप्राणइतिविख्यातोवायुःक्षेत्रचरःप
रः कंठाद्यात्मोस्थितःप्राणःसदावहतिदेहिनां ४९ सृजतेजीवमाश्वासस्यबहिर्गत्वा
निवर्तते पिंगलेडापथेगत्वा--चगगनामृतं ५० निहंत्यजीवसंतर्प्पणःकंद
प्रवर्तते अपानेचपुनःकदाचिदितःकालदीपणा ५१ निश्वासोच्छ्वासकोहातिज्ञा
पन्हंसेत्यहर्निशं हंसश्चाष्टादशदलेजीवात्माहृदयांबुजे तिष्ठन्करोतिचैतन्यंयोत
दीपोघटेयथा वह्निकर्मगुणोर्बुद्धिसंस्थितःत्रिगुणात्मकः ५२ याहोपंचेंद्रियार्थाना
मनोहृतेनसर्वदा चेतयन्निखिलंदेहंजीवात्माहावकः स्वभुक्त आत्मानंनैवजानाति

श्रा
२०
270

तिकामक्रोधादिभिर्हतः स एव जीवः सप्राणी सशरीरी [illegible]यते स एव गर्भः दुःखसंसो
च्छ्वासेनैव कर्मणा अन्यैः संयुतः सर्वैर्दहितो बालकाकृतिः ५५ मातुराहारवशतो दे
हो गर्भोऽभिवर्धते ततो गर्भस्थितः प्राणी चिंतयन्किं कृतं मया ५६ निःकृतं येन निरा
ये गर्भे खे पतितोऽस्म्यहं ५७ उल्वनालकरपादाभ्यां कृत्वा द्वारे विनिर्गतः योनिद्वारे वि
निःक्रांतो विसंज्ञः पतितः क्षितौ न स्मरेत्पूर्वं स्मरेत्किंचिन्मायया बध्यते पुनः अज्ञानेन
हतो बाल्ये यौवने रागहतस्तथा ५९ वार्धकेऽपत्यचिंताद्यैः कर्मभिर्बध्यते पुनः न
न श्राद्धयत्येकदा दपानः कालरूपवान् ६० प्राणं बद्धिः करोत्येव शरीरात्कंपितः
किल ऊर्ध्वश्वसंहतः प्राणोपान्तलयस्थितिस्ततः यया तमनुयात्येव जीवः का।
लपाशादितः निर्गच्छन्नेव वपुषो घोरदूतैर्यमकिंकरैः ६२ नीतं नयंति बहुधा भीष।
णैर्यमांतिकं पंचेंद्रियमनोबुद्धितन्मात्रैर्भूतपंचकैः ६३ युतः कर्मशरीरेणाप्र।
याति यमसंनिधिं ततो यमाज्ञया स्वर्गं नरकं वा प्रपद्यते ६४ अवशिष्टेन पुण्येन।
पापेन च समन्वितः तेभ्यो निर्गत्य भूतेषु जायते कर्मभिः पुनः ६५ एवं कदाचि

नरकं स्वर्गयोन्यंतराण्यपि प्रयाति जीवो जीवानां मोहितो भवसंकटे ६६ एते योग
रसायनात् एते हि जीवसञ्ज्ञा वा भवभावनया हिताः ब्रह्मणा कल्पिताकाराः सह
स्रायुतकोटिशः ६७ संख्यातीताः पुरोत्पन्ना जायंते चापि चानघ उत्पत्स्यंते पि चैवा।
न्ये कणौघा इव निर्झरात् स्ववासनावशावेशादाशाविवशतां गताः दशास्वतिविचि
त्रासु स्वयं निगडिताशयाः अनारतं प्रतिदिशं प्रांतिनेषं जले स्थले जायंते च म्रियंते च
बुद्बुदा इव वारिणि ७० केचित्प्रथमजन्मानः केचिज्जन्मशताधिकाः केचिच्चासंख्य
जन्मानः केचिद्द्वित्रिभवान्तराः विहरंति जगत्केचिद्द्विपतन्त्युत्पतंति च कंडकाश
वहलेन मृत्युना विवर्तंहताः ७२ आशापाशशताबद्धा वासनाभाववाहिनः का
मात्कायमुपायांति वृक्षाद्वृक्षमिवांडजाः दिवि देवा भुवि नरा पाताले भोगिनो ह्य।
राः ब्रह्मांडोदुंबरफले स्फुरन्मशकवत्स्थिताः ७४ तावद्भ्रमंति संसारे प्राणिनो।
मनसो भ्रमात् यावन्न ज्ञानपश्यंति स्वं चिदात्मानमात्मना ७५ चिदानंदमये देवी
क्रियतां चित्तसंगतिः मोहदीर्घमहानिद्रां त्यज्यतां संप्रबुद्धता ७६ तत्कर्मयत्नब

श्री
२३१
271

धायस्याविद्यायाविमुक्तये आयासामपरंकर्मविद्यान्याशिल्पनैपुणं ३३ एतेश्रीवा।
सिष्टात् इतिश्री॰ शांतरसेशारीरव्याख्यानेपरिच्छेदः २४५ अथयोग मंत्रयोगोलयस्त॰
वराजयोगोहठस्तथा योगश्चतुर्विधःप्रोक्तोयोगिभिस्तत्वदर्शिभिः १ आसनंप्रा।
णसंरोधोध्यानंचैवसमाधिकः एतच्चतुष्टयंविद्धिसर्वयोगेषुसंमतं २ ब्रह्मविष्णु॰
शिवादीनांमंत्रजापविशारदैः साधितोमंत्रयोगस्तुवत्सराजादिभिर्यथा ३ इतिमं॰
त्रयोगः अथलययोगः कृष्णद्वैपायनाद्यैस्तुसाधितोलयसंज्ञितः नवस्वेवचच।
क्रेषुलयंकृत्वामहात्मभिः ४ ब्रह्मचक्रंप्रथमंस्यात्त्रिगुणावर्तभगाकृति आधारे
मूलकंदाख्यंकामरूपंचतज्जगुः ५ तदेववह्निकुंडंस्यात्तत्रकुंडलिनीतथा तां
जीवरूपिणींध्यायेज्ज्योतिष्कंमुक्तसिद्धये ६ स्वाधिष्ठानंद्वितीयंस्याच्चक्रंतन्मध्य।
मेविदुः पश्चिमाभिमुखंलिंगंप्रवालांकुरसन्निभं ७ तत्रोड्डियाणयावेतुतद्ध्या
त्वाकर्षयेज्जगत् तृतीयंनाभिचक्रंस्यात्तन्मध्येभुजगीस्थिता ८ पंचावर्तामध्य॰
शक्तिश्चिद्रूपाविद्युदाकृतिं तांध्यात्वासर्वसिद्धीनामयनंजायतेध्रुवः ९ चतुर्थं॰

हृदयेचक्रंविज्ञेयंतदधोमुखं ज्योतीरूपंचतन्मध्येहंसंध्यायेत्प्रयत्नतः ९ तंध्यायतो
जगत्सर्वंवश्यंस्यान्नात्रसंशयः पंचमंकंठचक्रंस्यात्तत्रवामेइडाभवेत् ११ दक्षिणेपिं
गलानाडीसुषुम्णामध्यतःस्थिता तत्रध्यात्वाशुचिज्ज्योतिःसिद्धीनांभाजनंभवेत् १२
भ्रूचक्रंसप्तमंविद्याद्बिंदुस्थानंचतद्विदुः भ्रुवोर्मध्येवर्तुलंचध्यात्वाज्योतिःप्रमुच्यते ·
१३ अष्टमंब्रह्मरंध्रेस्यात्परंनिर्वाणसूचकं तद्ध्यात्वासूचिकाग्राभंधूमाकारंविमु
च्यते १४ तच्चजालंधरंज्ञेयंमोक्षदंलीनचेतसां नवमंव्योमचक्रंस्यात्दलैःषोड
शभिर्युतं संविद्रूपाचतन्मध्येशक्तिमूर्ध्वास्तथापरा तत्रपूर्णगिरौपीठेशक्तिंध्या
त्वाविमुच्यते १५ एतेषांनवचक्राणामेकैकंध्यायतोमुनेः सिद्धयोमुक्तिसहिताः
करस्थास्युर्दिनेदिने ७ कोदंडद्वयमध्यस्थंपश्यंतिज्ञानचक्षुषा कदंबगोलका
कारंब्रह्मलोकंव्रजंतिते १८ ऊर्ध्वशक्तिनिपातेनअधःशक्तेर्निकुंचनात् मध्यश
क्तिप्रबोधेनजायतेपरमंसुखं १९ इतिलययोगः अथराजयोगः दत्तात्रेयादिभिः
पूर्वंसाधितोयंमहात्मभिः राजयोगोमनोवाय्वोःस्थिरीकृत्वाप्रयत्नतः २० पूर्वाभ्या

स्तोमनोवातोमूलाधारवन्हिकुंचनात् पश्चिमंतंतुमार्गेणघंटालिंगंततःप्रवेशयेत् २१ ग्रंथित्र-
यंभेदयित्वाभित्वाभ्रमरकंदरं ततस्तुनादयेद्विंदुंतत्रलीनोप्रलयंव्रजेत् २२ तदभ्यासात्
स्थिरस्यात्तातोर्ध्वरेताश्चजायते परानंदमयोयोगीजरामरणवर्जितः २३ अथवामूल-
संस्थानमुद्यतेस्तप्रबोधयेत् सुप्तांकुंडलिनींशक्तिंविसतंतुविभाकृतिं २४ सुषुम्णा-
न्तःप्रविश्यैवपंचचक्राणिभेदयेत् ततःशिवेशशांकेतुस्फुरन्निर्मलरोचिषि सहस्रदा-
लपद्मांतःस्थिरेशक्तिंनियोजयेत् अथतत्स्वधयास्रवांसबाह्याभ्यंतरांतनुं प्लावयित्वा
ततोयोगीनकिंचिदपिचिंतयेत् ततउत्पद्यतेतस्यसमाधिर्निस्तरंगकः २७ एवंनि-
रंतराभ्यासाद्योगसिद्धिःप्रजायते एतेश्लो·यवस्य इतिश्लो·धवविरचितायांपद्धत्यां
वीरवसेयोगादिवर्णनेनामपरिच्छेदः २५ अथहठयोगः द्विधाहठःस्यादेकस्तु-
गोरक्षादिसुसाधितः अन्योमृकंडुपुत्राद्यैःसाधितोनाशमुद्यतेः १ तत्रगोरक्षसह-
शैःसाधितोयःसकथ्यते धीरैरपिसिद्धिडःसाध्यःकिंपुनःप्राकृतैर्जनैः २ आसनंप्रा-
णसंरोधःप्रत्याहारोथधारणा ध्यानंसमाधिरेतानियोगांगानिस्मृतानिषट् ३ एकांते

विजनेदेशेपवित्रेचनिरुपद्रवे कंबलाजिनवस्त्राणामुपर्यासनमभ्यसेत् ४ आसनोपविष्टोयो

कृत्वागुरुसंस्थोप्रयत्नतः गुरुमध्येनयोगात्मोपाणीपद्मासनेनचिंदं ५ इत्यासनं अथप्रा

णायामः तत्रपद्मासनेबद्धाततःसंकोचयेदधः समदंडशिरःकृत्वानासिकांतर्दृशं

नयेत् ६ यथैवोत्पलनालेनयाकर्षतिनिरोजलं योगीयोगसमाधिस्थस्तथाकर्षति

मारुतं ७ काकचंचुपुटीकृत्यगोष्ठेशक्तिःनिलेपिवेत् ॐकारध्वनिनाकृष्यपूरयेद्या

वदंतरं पूरणात्पूरकंप्रोक्तंकुंभस्तस्यनिकुंभनात् ८ रेचकंरेचनात्कृत्वात्रयोतंशोध्य

तेत्रिभिः प्राणायामानतःषष्टिंकुर्यादिवसतृतीयं ९ चत्वारिंशाद्धमध्यायां — विंशा

तिर्भवेत् अर्धरात्रेविंशतिःस्यादेवंप्राणविनिग्रहः शरीरलघुनादीप्तजठराग्निविवर्ध

ने कृशत्वचशरीरस्यजायतेवैभवेत्तदा १० लवणंवर्षपाम्लमुष्णंरूक्षंचतीक्ष्णकं

स्त्रीसेवामग्निसेवांचवक्ताशित्वंचवर्जयेत् ११ क्षीरंघृतंचमिष्टान्नमिताहारस्यशस्यते

मितोक्तिःपवनाभ्यासेनिद्रायाश्चजयस्तथा १२ केवलेकुंभकेसिद्धेरेचपूरविवर्जिते

ततस्तुदुर्लभंकिंचित्त्रिषुलोकेषुविद्यते ततोधिकतराभ्यासाद्भवतःस्वेदकंपते ततो

या
२२३
273

धिकतराभ्यासाद्दार्दुरीजायतेभृशं १९ यथैवदर्दुरीगच्छेत्तद्वदुत्प्लुत्यभूतले पद्मास।
नस्थितोयोगीतथागच्छतिभूतले ततोधिकतराभ्यासाद्भूमित्यागश्चजायते स्वल्प।
वाबहुवाभुक्त्वायोगीनव्यथतेतदा ९ अल्पमूत्रपुरीषश्चअल्पानिद्राचजायते को·
टिभोऽःखलालाखेदोदुर्गंधितानतनोः एतानिसर्वदातस्यनजायंतेततःपरं स्त्री·
संगंवर्जयेयत्नाद्बिंदुरक्षेत्प्रयत्नतः आयुःक्षयोबिंदुनाशादसामर्थ्यंचजायते २० इति।
प्राणायामः अथप्रत्याहारः ॥ विषयद्वारनिःक्रांतंयावत्सविषयान्प्रति चित्तंनिवा·
र्यतेयेनप्रत्याहारःसउच्यते २१ इतिप्रत्याहारः अथपंचधारणा गुरूपदेशतश्चित्ता।
मेकस्मिन्स्थानकेयदि वायुश्चरुध्यतेयत्रधारणासाभिधीयते २२ नाभेरधोगुदस्या
र्धेघटिकापंचधारयेत वायुंततोलभेत्पृथ्वीधारणांतन्नयापदं २२ पृथिवीसंभ।
वैर्दुःखैर्नभवेत्तस्ययोगिनः इतिपृथ्वीधारणा नाभिस्थानेततोवायुधारयेत्पंचना।
डिकाः आग्नेयीधारणासेयंमृ— नलभयवर्जिता २ इतितेजोधारणा नाभ्यूर्ध्वमं·
ङ्गलेवायुंधारयेत्पंचनाडिकाः आग्नेयीधारणाम नासाभ्रूमध्यदेशेतुवायुंतथैवधा।

२२३

रयेत् वायवीयाधारणीयं मृत्युस्तस्य न वायुतः इति वायुधारणा भ्रूमध्यस्योपरि स्पष्टा द्वार
येत्तं च नाडिकाः वायुं योगी प्रयत्नेन सेयमाकाशधारणा २६ आकाशधारणां कुर्वन्मृ
त्युं जयति निश्चितं यत्र तत्र स्थितो वापि सुखमत्यंतमश्नुते २७ इति पंचधारणा अथ ध्यानं
वायुः परिचितो यत्नादग्निना सह कुंडली बोधयित्वा सुषुम्णायां प्रविशेदनिरोधतः
महापथं प्रविश्यैवं मूलस्थाने लयं व्रजेत् तदा तदा भवेद्योगी त्रिकालामलदर्शनः ।
२८ इति ध्यानमथ समाधिः यदेतद्ध्यानमाख्यातं तच्चेत्सविगमत्यपि चैतन्यानंदरूपेण
स समाधिरुदीरितः ३० इति समाधिः अथ जाग्रत्स्वप्नसुषुप्तितुरीयावस्था प्रोच्यते ·
बुद्धिपूर्वं च यज्ज्ञानं बहिर्विषयसेवितं प्रत्यक्षमनिरुद्धं च तज्जाग्रदिति गच्यते ३१ अ·
र्थाभावे तु यज्ज्ञानं प्रत्यक्षमिव दृश्यते गंधर्वनगराकारं स्वप्नं तदुपलक्षयेत् ३२ ज्ञा·
नं तु मात्र भावे तो निःस्पंदं यत्र प्रतिष्ठितो उत्पत्तिः प्रलयश्चैव सुषुप्तिं तामवधारयेत् ३३
जीवभावश्च निद्रा च दृश्यं तत्र न विद्यते तत्तुरीयं इति प्रोक्तं उत्पत्तिलयवर्जितं ३४ इति
अवस्थाचतुष्टयं अथ देहस्थिरीकर्त्तुं योगिनां सिद्धिमिच्छतां कथ्यते शुद्धकर्माणि ।

षा
२२४
२७५

यैः सिद्धिं प्राप्नुवन्नराः ३५ महामुद्रा नभोमुद्रा उड्डियानं जलंधरं मूलबंधं स्थिरीकार्यं यः ।
करोति स सिद्ध्यति ३६ अथ महामुद्रा पार्ष्णिं तु वामपादस्य योनिस्थाने नियोजयेत् ।
प्रसार्य दक्षिणं पादं हस्ताभ्यां धारयेद् दृढं ३७ अंतःकपालकुहरे जिह्वामाकुंच्य धार-
येत् वामांगेन सममभ्यस्य दक्षिणांगेन चाभ्यसेत् ३८ इति महामुद्रा अंतःकपालवि-
वरे जिह्वामाकुंच्य धारयेत् भ्रूमध्यदृष्टिरमृतं पिबेत् खेचरमुद्रया ३९ इति नभोमुद्रा
कंठमाकुंच्य हृदये स्थापयेद् दृढमिच्छया जालंधरो बंध एष सुधाक्षयनिवारणः ४०
नाभिस्थोऽग्निः कपालस्थसहस्रकमलच्युतं अमृतं सर्वदा सर्वं पिबन् ज्वलति देहिनां ।
४१ यथासोऽग्निः सदमृतं न पिबेत् तद्धितत्स्वयं याति पश्चिममार्गेण एवमभ्यसतां सदा
अमृतं कुरुते देहे जालंधरमिति स्मृतं ४२ इति जालंधरं उड्डियानं तु सहितं क-
थितां गुरुणा सदा अभ्यसेद् सततं यस्तु वृद्धोऽपि तरुणी भवेत् ४३ नाभेरूर्ध्वमधश्चा-
पि तानं कुर्यात् प्रयत्नतः षण्मासाभ्यासतो मृत्युं जयत्येव न संशयः ४४ इति तडि-
यानं मूलबंधं च यो नित्यमभ्यसेत् स हितत्ववित् गुदं पार्ष्णिना संपीड्य नतं समाकुंचयेद् बला

२०४

त् वारंवारंयथाचोर्ध्वंसमायातिसमीरणः प्राणापानौनादबिंदूमूलबंधेनचैक-
तां गत्वायोगस्यसंसिद्धिंगच्छतेनात्रसंशयः ४६ अपानप्राणयोरैक्यंक्षयोमूत्रपु-
रीषयोः युवाभवतिवृद्धोपिसततंमूलबंधनात् ४७ इतिमूलबंधः पृष्ठंबध्वं।
दृढंकुर्यादनंगंस्थिरमंचयं दंडधारणमेतद्धियोगिनांपरमंस्मृतं ४८ इतिदंड।
धारणं एतेयोगशास्त्रेभ्यः इतिशास्त्रेभ्यः इतिशा॰ प्रथमहठयोगपरिच्छेदः १५२
अथमार्कंडेयसमाधितोद्वितीयोहठयोगः श्लोकार्द्धेनप्रवक्ष्यामियदुक्तंग्रंथ-
कोटिभिः ममेतिमूलंदुःखस्यनममेतिचनिर्वृतिः १ निर्ममत्वविरागायोगसं
ततिः योगाच्चज्ञायतेज्ञानंज्ञानान्मुक्तिःप्रजायते २ उपभोगेनपुण्यानांप्राक्ता।
नानांतथाहृतां कर्तव्यमितिनित्यानामकामकरणात्तथा ३ असंचयादपूर्व-
स्यत्यागात्पूर्वार्जितस्यच कर्मणांबंधमाप्नोतिशरीरेनपुनःपुनः ४ अथहठक-
थ्यतेस्माभिः कर्मणांयेनबंधनं छिद्यतेसउपायेनसम्यक्त्वातत्रप्रवर्तितां ५ अष्टा-
ंगानियोगस्ययमोनियमआसने प्राणायामःप्रत्याहारोधारणाध्याननंतराः ६

शा
२२५
२२५

अहिंसासत्यमस्तेयंब्रह्मचर्यपरिग्रहः इष्टानिष्टयमाश्चित्तायमाएतेप्रकीर्तिताः ७ अथ।
नियमः स्वाध्यायशौचसंतोषदेवताराधनंतपः वैराग्यंचजनासंगोनियमोयंप्रउच्य
ते ८ अथासनं आसीनः स्थितः शांतोनचव्याकुलचेतनः युंजीतयोगंयोगज्ञो।
नित्यसिद्ध्यर्थमादृतः ९ नाश्नीतेनातिवैचास्मिनदुर्गेनाग्नुनस्तटे नसोपद्रवदेशेऽ-
योगः संधीयतेक्वचित् १० एकांतेविजनेवापिपवित्रेनिरुपद्रवे सुखासीनसमा-
धिः स्याद्वस्त्राजिनकुशोत्तरे ११ पद्ममर्धासनंचापितथास्वस्तिकासजादिकं आस्थाय
योगंयुंजीतकृत्वाचप्रणवंहृदि १२ समः समासनोभूत्वासंहृत्यचरणावुभौ।
संवृतास्यस्तदाचसम्यगाविष्टमचलायतः १३ पाणिभ्यांलिंगमाछाद्यवृषणावस्पृशान्व।
यतः स्थितः किंचिदुन्नामितशिरोदंतैर्दंतानसंस्पृशन् १४ संपश्यन्नासिकाग्रं-
स्वंदिशश्चानवलोकयन् ऊर्ध्वांहृत्पृष्ठंवशामुड्डियानेनयोदरे १५ ज्ञानोच्चा।
रणोत्कृत्वाऊर्ध्वंसंस्योपयत्नतः ऊरूमध्येतथोत्तानौपाणीपद्मासनेत्विदं १६ द-
क्षिणाभ्युन्नतेवामेपादंतस्मात्तदक्षिणं वामोपरिसंस्थानमेतदर्धासनेमतं १७।

पार्ष्णिं तु वामपादस्य योनिस्थाने नियोजयेत् वामोरोपरि संस्थाप्यो दक्षिणः सिद्धमा।
सने १८ इत्यासनमथ प्राणायामः प्राणायामैर्दहेद्दोषान्समाहारेण पातकं धारणा
भिस्तु ऋग्वाणि ध्यानेनानीश्वरान्गुणान् १९ यथा पर्वतधातूनां ध्मातानां दह्यते मलं
तथेंद्रियकृता दोषा दह्यंते प्राणनिग्रहात् २० वशीकर्तुं यथेच्छातो नागेनयति हस्ति
पः तथैव योगी च्छंदेन प्राणं नयति साधितं २१ यथा हि साधितः सिंहो मृगान्हंति न।
मानवान् तथा हि साधितः प्राणः किल्बिषान्हंति तं प्राणायामं विना योग।
साधयेयस्तु मंदधीः नसमाधिगतिं याति पंगुर्वाजिगतिं यथा २३ तस्मात्तु साध
नं कुर्यात्प्राणायामस्य योगवित् प्राणयाननिरोधस्तु प्राणायामः प्रकीर्तितः २४
सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह त्रिः पठेदायतः प्राणः प्राणायामः स उच्यते
२५ चलःस्पंदनमात्रस्य यावद्द्वादशमात्रकः तावन्निरुध्यते प्राणः प्राणायामः स
एव हि २६ स्वजानुतः करावर्तं यावद्द्वादशकोटिकाः तावन्निरुध्यते प्राणः प्राणा
यामः स उच्यते २७ प्राणायामो लघुस्त्वेको द्विगुणो मध्यमः स्मृतः उत्तमस्त्रिगुणो

शा
२२९
276

ज्ञेयश्चैषा वैदिकी स्थितिः २८ प्रथमेन जयेत्स्वेदं द्वितीयेन च वेपथुं विषादं हि तृतीये-
न जयेद्दोषाननुक्रमात् २९ द्विगुणेन च यास्तुष्ट्या प्रत्याहारस्तु धारणा ध्यानं समाधि
र्वित्येवं प्राणायामादनुक्रमात् ३० तस्मात्फलं सदा योगी प्राणायामपरो भवेत् ।
श्रूयतां मुक्तिफलदं तस्यावस्थाचतुष्टयं ३१ धृतिः प्राप्तिस्तथा संवित्प्रसादश्च महामु
नेः स्वरूपं श्रूयतां चैतेषां कथ्यमानमनुक्रमात् कर्मणामिष्टदुष्टानां जायते फलसंचयः
चेतसोऽर्थकषायत्वाद्यत्र सा धृतिरुच्यते ३३ ऐहिकामुष्मिकान्कामांल्लोभमोहात्मको-
भयत् निरुध्यात्मसदा योगी प्राप्तिः सात्सार्वकामिकी अतीतानागतानर्थान्विप्रकृष्टतिरो
हितान् ३५ विजानातिस्सदा योगी स्तदा संविदितिस्मृता यांति प्रसादं येनास्य मनः पंचव वाय
वः ३६ इन्द्रियाणीन्द्रियार्थांश्च स प्रसाद इतिस्मृतः ३७ प्राणायामस्य युक्तिं
स्तु सर्वाभ्यासस्य कथ्यते यां चक्रुर्मुनयः सर्वे नाडीसंशुद्धिहेतवे ३० पूर्वं दक्षि
णहस्तस्यांगुष्ठेनैव पिंगलम् निरुद्धा पूरयेद्वायुमिडायास्तु शनैः स्तयोः ।
३८ ॥ ३९ यथाशक्तिनिरोधेन तथा कार्यश्च कुंभकम् ॥ ॥ ॥

पुनस्त्यजेत्पिंगलयाशनैरेवनवेगतः ३९ पुनःपिंगलयापूर्यपूरयेदुदरंशनैः धा।
रयित्वायथाशक्तिरेचयेदिडयाशनैः ४० यथात्यजेत्तयापूर्यधारयेदनिरोधतः ना·
डीविशुद्धोजायतेततः कथितायथेकया ४१ इतिप्राणायामः अथप्रत्याहारः शब्दा।
दिभ्यःप्रयत्नानियतत्नानिसुनात्मभिः प्रत्याहियंतेयोगेनप्रत्याहारस्ततःस्मृतः ४२
सबाह्याभ्यंतरंशौचंनिःपाद्याकंठनाभितः पूरयित्वाबुधैःप्राणैःप्रत्याहारमुपक्र।
मेत् ४३ रजसस्तमसोवृत्तिंसत्त्वेनरजसस्तथा स्वच्छायनिर्मलेसत्त्वस्थितोयुंजीत·
योगवित् ४४ इंद्रियाणींद्रियार्थेभ्यःप्राणादीन्मनएवच निरुध्यसमवायेनप्र।
त्याहारमुपक्रमेत् ४५ यस्तुप्रत्याहरेत्कामान्सर्वांगानीवकच्छपः सदात्मरतिरे।
कस्थःपश्यत्यात्मानमात्मना ४६ इतिप्रत्याहारः अथधारणा प्राणायामादश।
द्वौचधारणासाभिधीयते द्वेधारणोस्मृतोयोगोमुनिभिस्तत्त्वदर्शिभिः ४७ आधार
गुदमूलंनाभिश्चहृत्कंठंतालुनासिके भ्रूमध्येमस्तकद्वारेदशस्थानेषुधारणा ४८
गुरूपदेशमासाद्यएकस्मिन्स्थानकेयदि स्थापनेयन्मनोवातोधारणासाभिधीयते·

शा
२०१
277

जितंजितंशनैर्भूमिमरोहेनयथाक्रमं दोषान्व्याधीस्तथामोहमाधते भूवनिर्जिता ५०
इतिधारणा अथध्यानं शून्येष्वप्यवकाशेषु गुहासुपवनेषुच नित्ययुक्तः सदायोगी
ध्यानंसम्यगुपक्रमेत् ५१ सक्तसंगोजितमनालघ्वाहारोजितेंद्रियः पिधायवुद्धि
द्वाराणिमनोध्यानेनिवेशयेत् ५२ आत्मानंवजगत्सर्वंदशानित्याविभिन्नया चिदा-
काशमयंध्यायेयोगीयातिपरांगतिं ५३ अथवाश्रोच्यतेध्यानमन्यदेवात्रयोगिनां
रहस्यपरमंमुक्तेः कारणांप्रथमंचयत् ५४ वायुवच्चंचलचित्तंस्थिरीकर्त्तुंनशक्यते
तदर्थंसकलेयोज्यंतत्तोभवतिनिःकले ५५ मूलाधारस्थितंज्योतिस्वप्रदीपकलि-
काकृतिं प्राणवेनसमाकृष्यद्वादशांतेनिवेशयेत् ५६ ततोजयेच्चप्राणंवमूलाधा-
रात्समुत्थिते निर्यातंद्वादशमेहारेमनसादानवृपिणां ५७ यथाश्रयुक्ताकारः प्र-
तिनिर्यातिमूर्धनि तथोंकारमयोयोगीश्रुत्तरत्वनतोभवेत् ५८ ऊर्वन्नेवंयथाप-
येणमनोनेत्रेणयोगवान् हंसंबिंदशिरवांज्योतिस्तत्तोलयमवाप्नुयात् ५९ ब्रह्म-
द्वारमुखेस्थूलंनिर्विकल्पपरात्परं परमंज्योतिरासाद्ययोगीतन्मयतांव्रजेत् ६०

निर्विकल्पपदे प्राप्तं जीवेत्तन्नयतां गते न स्पृशंति सर्वकर्माणि तस्मिन् दृष्टे परावरे ६१ ह
त्सूर्छिये यथा पत्रोभ्रकस्मादेव दृश्यते बुद्धिस्थो दृश्यतामेति कज्ञिसेवत्तथा विभुः ६२
अयत्नः स्फुरतो मध्ये पार्श्वतो य समंततः विस्फुलिंगवज्ज्वालितस्सूर्यकोटिसमप्रभः ६३
रतांते स्त्री यथा मंदं तत्तत्काल्हं न बुध्यते इ मरणोपि न जानाति कोहं योगी तथा प्रमान्
छण्णोस्याश्चर्यवत्कोपि कोप्याश्चर्यवदीक्षते श्रुत्वा दृष्ट्वा तथा ध्यानेन संप्रवेदनकश्च
न ६५ गुरुप्रसादतो लब्ध्वा लब्ध्वा यत्रात्मसंभवेत् अभ्यासाद्दृश्यते देवो ज्ञानदृश्यम
हेश्वरः ६६ निजः परं स्फुरति मनतां तमसः परस्तादादित्यवर्णो कनकस्वरूपं आत्मा
नमात्मनि गतः प्रकृतिर्विभिन्नमानंदमात्रमिति पश्यति यः समुक्तः ६७ इति ध्यानं
समाधिः समतावस्थाजीवात्मपरमात्मनोः निस्तरंगपदप्राप्तिः परमानंदरूपि
णी ६८ निःश्वासोच्छ्वासयुक्तोवा निःस्पंदोचललोचनः शिवध्यायी स्वलीनस्स
माधिस्थः स उच्यते ६९ न स्पृशोति यदा किंचिन्न पश्यति न जिघ्रति न च स्पर्शं विजा
नाति स समाधिस्थ उच्यते ७० इति समाधिः अनेन स्वरूपचिन्मात्रे परिणामस्थिरा·

मा.
२७८
278

नयः तुर्यातीतंपदंतत्स्यात्मनस्येभूयोनशोचति ४ निद्रादोजागरस्वप्नांतेयोभावउप
जायते तद्भावनाद्धितमनायोगीभवतितन्मयः ७२ यथाकाशोवदेकात्मासर्वभा
वगतोपिसन् तथाविरज्यतात्मेतिसमद्धात्मामहेश्वरः ७३ यथाजलंजलेनैकंयाति।
निमज्ज्यपगच्छति तथात्मसाम्यतामीयुर्योगिनःपरमात्मना ७४ ततोनजायतेने·
वर्धतेनविनश्यति नापिक्षयमवाप्नोतिपरिणामंनगच्छति ७५ छेदंक्लेदंतथा·
दाहंशोषंशस्त्रादितोनच भूतवर्गादवाप्नोतिशब्दाद्यैर्ह्रियतेनच ७६ इतितुर्यातीता
वस्था पद्मपुराणोक्तः योगशास्त्रसमाप्तः इतिश्री·मार्कंडेयसाधितीयहठयोग·
परिच्छेदः १५२ अथमनःस्थिरीकरणभावः यदानत्रमनोयातिध्यायतोयो·
गिनस्तदा नैववहिर्लयंकुर्यात्शिवःसर्वगतोयतः १ एतत्ध्यानयामवेद्यतःछि
नपश्यमचंचलं सर्वत्रैकंशिवंज्ञात्वानिविकल्पाविधीयते २ कामक्रोधादयः
सर्वेमतिरहाराणहंकृतिः गुणाविविधकर्माणिविलीयंतेमनःस्तथात् ३
श्मनस्तांगतेचित्तेकर्मणांसंचयस्तथा यथाचित्रपटेदग्धेदह्यतेचित्रसंशयः ४ २७८

नक्रयोगाद्यथाद्वीरं काठिन्यमुपगच्छति तथाज्जीवोमनःस्थैर्यात्स्वंब्रह्मत्वाधिगच्छ-
ति ५ यथाहिमप्रभावेनजलंस्थानत्वमाप्नुयात् तथामनःस्थिरत्वेनजीवःशि-
वमयोभवेत् ६ शिवशक्तिर्भवेज्जीवोजीवशक्तिर्मनःस्मृतं जीवंशिवंप्रापयितृ
मनएवहिकारणं ७ जीवःशिवःशिवोजीवोभेदोनास्त्यनयोःक्वचित् मनो-
लिप्तोभवेज्जीवोमनोमुक्तःसदाशिवः ८ एतेमम इतिशा· मनःस्थिरीकरणप्रभा-
वावर्णनंपरिच्छेदः (१०) अथयोगमहिमा अलौल्यमारोग्यमनिष्ठुरत्वंगंधःशु-
भोमूत्रपुरीषमल्पं कांतिःप्रसादःस्वरसौम्यताचयोगप्रवृत्तेःप्रथमंहिचिह्नं
अनुरागंजनोयातिपरोक्षेगुणकीर्तनात् नबिभ्यतिचसत्वानिसिद्धेर्लक्षणमुत्तमं
२ शीतोष्णादिभिरत्युग्रैर्यस्यबाधानजायते नभीतिमेतिचान्येभ्यःतस्यसिद्धिरुप-
स्थिता ३ इतियोगमहिमा अथदोषोपसर्गचिकित्सा प्रमादाद्योगिनोदोषायदि
तेस्युश्चिकित्सितं तेषांनाशायकर्तव्यंयोगिनांतन्निबोधत ४ बाधिर्यंजडतालो-
पःस्मृतेर्मौकतांधता ज्वरश्चजायतेतत्रतत्क्षणादज्ञानयोगिनः ५ स्निग्धायवा

गी
२३५
२७९

संनादस्तस्योचितं तत्रैव धारयेत् तावच्छूलप्रशान्त्यर्थं मूर्द्धावर्ष्मनि यथाविधि ८ एवाङ्गे वापि
पवने वायुर्मूर्धोपरि विनिवेशयेत् नव्रुकंपे मद्भावे लास्ये चेतनस्तु धारयेत् ७ विकृष्टे घन
सोवाचे बाधिर्ये श्रवणेन्द्रिये तस्मिन्नदादेषोनस्मिन तस्मिंस्तडपकारणं धारयेद्धारणा
मुस्सांद्य गीने धीने विदाहिनि ८ काष्ठशिवसि संस्थाप्य तथा कोष्ठेन ताडयेत् [illegible]
स्मृतेः स्मृतिः सद्यो योगिनस्तेन जायते ९ अमानुषसत्त्वं मत्त योगिनं प्रविशेद्यदि
वाय्वग्निधारणाच्चैनं देहसंस्थं विनिर्दहेत् ११ एवं सर्वात्मना कार्या रक्षा योगवि
दानिशं धर्मार्थकाममोक्षाणां शरीरं साधनं यतः १२ प्रवृत्तिलक्षणाख्यानाद्यो·
गिने विस्मयान्नदा विज्ञानं विलयं याति तस्माद्गोप्याः प्रवृत्तयः १३ उपसर्गाः प्रव·
र्तन्ते दृष्टेऽप्यात्मनि योगिनः ये तांस्ते प्रतिवक्ष्यामि समासेन निबोध मे १४ काम्याः
क्रियास्तथा कामान्मानुषानभिवाञ्छति स्त्रियो दानफलं विद्यां मायां कुप्यं धनं वसु
देवत्वममरेशत्वं रसायनबहिक्रियाः मृत्प्रपतनं यज्ञजलाग्न्यावेशनं तथा
चित्तमित्यं प्रवृत्तं हि योगी यत्नान्निवारयेत् ब्रह्मसंगि मनः कुर्वन्नुपसर्गात्प्रमुच्यते।

२३५

ते १७ उपसर्गैर्जितैरेभिरुपसर्गास्ततः पुनः योगिनः संप्रवर्त्तंते सत्वराजसताम-
साः १८ प्रातिभः श्रावणो देवो भ्रमावर्त्तौ तथापरौ पंचैते योगिनो योगविघ्नाय क-
टुकादयः १९ वेदार्थाशास्त्रकाव्यार्थान्यथाशिल्पान्यशेषतः प्रभवंति यदस्येति।
प्रातिभः सोभिधीयते २० शब्दार्थानखिलान्वेत्ति शब्दं गृह्णाति चैव यत् योजना।
नां सहस्रेभ्यः श्रावणः सोभिधीयते २१ अष्टौ यदा तदृष्यंते संमता देवयोनयः उप
सर्गं तमिस्माहुमेवमुन्मत्तवद्बुधाः २२ भ्राम्यते यन्निरालंबं मनो दोषेण योगिनः।
समस्ताधारविभ्रंशाद्भ्रमः स परिकीर्त्तितः २३ आवर्त्तश्वतोयस्य ज्ञानावर्त्तो यदाकु-
लः चित्तनाशसद्धनावर्त्तमुपसर्गः प्रजायते २४ एभिर्नाशितमार्गस्तु सकला देव-
योनयः उपसर्गैर्महाघोरैरावर्त्तंते पुनः पुनः २५ प्रावर्त्तकंबलं शुक्लं योगी तस्मान्म-
नोमयं चिंतयेत्परमं ब्रह्म कृत्वा तत्प्रवणं मनः २६ इति दोषोपसर्गचिकित्सा अथ
सप्तधारणा योगयुक्तः सदा योगी लघ्वाहारो जितेंद्रियः सूक्ष्माः स्तु धारणाः सप्त
भूराद्याः मूर्ध्नि धारयेत् २७ धरित्रीं धारयेद्योगी ततः सौक्ष्म्यं प्रपद्यते आत्मानं मन्यते

ग्रा
२८०
280

चार्थीतद्गुणंचजहातिसा २८ तथैवाप्सवसंतत्वंतद्रूपंचतेजसि स्पर्शोवायौतथा
तद्वद्धिभूतस्तस्यधारणा २९ व्योम्नःसूक्ष्मप्रवृत्तेचशब्दंतद्वज्जहातिसः मनसःसर्व-
भूतानामनस्याविशतेयदा ३० मानसीधारणाविप्रतस्मनःसोत्त्वंचजायते तद्वद्बुद्धि-
मशेषाणांसत्त्वानामानोत्पयोगवित् ३१ परित्यजतिसंप्राप्यबुद्धिसौक्ष्म्यमनुत्तमं य-
स्मिन्यस्मिंस्तुकृतेभूतेरागंमहामते तस्मिंस्तस्मिन्समासक्तिंसंप्राप्यसविनश्यति
तस्माद्विदित्वासूक्ष्माणिसंसक्तानिपरस्परं परित्यजतियोयोगीसपरंप्राप्नुयात्प-
दं ३३ एतान्येवतुसंधायसप्तसूक्ष्माणिसर्वदा भूतादीनांविरागोत्रसद्भावेपस
मुक्तये ३४ गंधादिषुसमासक्तिमित्येतदाविलंजगत् पुनःप्रवर्ततेमोक्षोत्तिब्र-
ह्मामरमानव ३५ समेतान्धारणायोगीसमतीत्ययदिच्छति तस्मिंस्तस्मिंस्तदा-
भूतेलयंयातिविधानतः ३६ देवानामसुराणांचगंधर्वोरगरक्षसां देहेषुलय-
मायातिसंगमाप्नोतिनक्वचित् ३० इतिसप्तधारणा अथाष्टमहासिद्धयः
अणिमालघिमाचैवमहिमाप्राप्तिरेवच प्राकाम्यंचतथेशित्वंवशित्वंचतथापरं

यत्रकामावसायित्वंगुणानेतांस्तथैश्वरान् प्राप्नोत्यष्टावनायासात्परंनिर्वाणसूच·
कान् ३९ सूक्ष्मात्सूक्ष्मतरोणीयाञ्छीघ्रत्वाल्लघिमागुणः महिमाशेषपूज्यत्वात्प्रा
प्तिर्नाप्राप्यमस्ययत् ४० प्राकाम्यमस्यव्यापित्वादीशित्वंयतईश्वरः वशित्वाद्वशिता
नामयोगिनःसप्तमोगुणः ४१ यत्रेच्छास्थानमप्युक्तंयत्रकामावसायिता ऐश्वर्य
कारणैरेभिर्योगिनःप्रोक्तमष्टधा ४२ एतेमार्कंडेयात् इतिश्री·योगमहिमादि·
वर्णनंपरिच्छेदः २५४ अथयोगिचर्या वाग्दंडःकर्मदंडश्चमनोदंडश्चतेत्रयः य·
स्यैतेनियतादंडःसत्रिदंडीनिगद्यते १ यानिशासर्वभूतानांतस्यांजागर्तिसंयमी
यस्यांजाग्रतिभूतानिसानिशापश्यतोमुनेः २ येनकेनचिदाछन्नोयेनकेनचिदा
शितः यत्रसायंगृहोयातितंदेवायोगिनंविदुः ३ मानापमानौयावेतौप्रीत्युद्वेग
कारौनृणां तावेवविपरीतार्थौयोगिनःसिद्धिकारकौ ४ चक्षुःपूतंन्यसेत्पादं
वस्त्रपूतंजलंपिबेत् सत्यपूतांवदेद्वाणींबुद्धिपूतंविचिंतयेत् ५ सर्वसंगविही
नश्चसर्वपापविवर्जितः जडवन्मूकवद्योगीविचरेन्नमहीतले ६ अभिधारा

विषंवन्हिंसमंतेयः प्रपश्यंति मानास्त्वधात्तवासाणांसयोगीकथ्यतेबुधैः ७ यस्मि
न्स्थानेनत्राणांतिष्टेदीहस्पोगीकथंचन चतुःसागरपर्यंतांपृथिवीयोददातिच तस्य
त्रस्यचयोभित्त्वांसमानावाप्यवासना प्राप्नोधनेचयत्नेषुदेवयात्रोत्सवेषुच ८ मा
हाजनेचसिद्ध्यार्थीनगच्छेद्योगचित्कचित् जातेषुमेतथ्यागावेसर्वस्मिंश्चभ्रमावजने
ष्वटेनयोगविद्वेत्येन्नतेष्वेवनिमग्नः यथैवमवमन्यंतेजनाःपरिभवंतिच ९ त-
थायुक्तश्चरेद्योगीसतांधर्ममदूषयन् भैक्ष्यचर्यानुवृत्तिहस्तेषुश्रोत्रियेषुचरेद्यतिः
फलमूलेषुवागच्छेत्पयस्तक्रेचसक्तवः ब्रह्मचर्यमलोभश्चदयाक्रोधःसचितता
१२ आहारलाघवंशौचंयोगिनांनियमाःस्मृताः सारभूतमुपासीतज्ञानेनत्कार्य-
साधकं १३ ज्ञानिनांबहुनायेयंयोगविघ्नकरीहिसा इदंज्ञेयमिदंज्ञेयमितियः
तृषितश्चरेत् १४ अपिकल्पसहस्रेषुनैवज्ञेयमवाप्नुयात् समाहितोब्रह्मपरोप्र
मादीशुचिरात्मवान्एकांतरस्संयतेन्द्रियः विशुद्धबुद्धिःसमलोष्टकांचनःप्राप्नोतियो
गीपदमव्ययंपरं १५ इतिश्री॰योगचर्याप्रविच्छेदः १५५ अथारिष्टज्ञानं प्रतीण

कर्मबंधस्तज्ज्ञात्वा कर्माक्षपयेस्थितं उत्क्रांतिकालेसंस्मृत्य पुनर्योगित्वमिच्छति १ ।
तस्मादसिद्धयोगेनसिद्धयोगेनवापुनः ज्ञेयान्यरिष्टानिसदायेनोत्क्रांतोनसीदति
अरिष्टानिविशिष्टानिशृणुष्व वक्ष्यामितानिमे येषामालोकनान्मृत्युंनिजंजानाति ।
योगवित् २ देवमार्गंध्रुवंशुक्रंसोमच्छायामरुंधतीं योनपश्येन्नजीवेत्सनरःसं
वत्सरात्परं ४ अरश्मिबिंबंसूर्यस्यवह्निंचैवांशुमालिनं दृष्ट्वैकादशमासात्तुनरो
नोर्ध्वंचजीवति ५ वांत्यांमूत्रेपुरीषेवायःसुवर्णंरजतंतथा प्रत्यक्षमथवास्वप्नेजी
वितंदशमासिकं ६ दृष्ट्वाप्रेतपिशाचादीनंगंधर्वनगराणिवा सुवर्णवर्णान्वृक्षांश्च
नवमासान्सजीवति ७ स्थूलःकृशःकृशःस्थूलोयोकस्मादेवजायते प्रकृते
श्चनिवर्तेततस्यायुश्चाष्टमासिकं ८ खंडंयस्यपदंपार्ष्ण्योःपादस्याग्रेयथाभवेत् पां
सुकर्दमयोर्वासप्तमासात्सजीवति ९ कपोतगृध्रकाकोलोवायसोवाय
मूर्धनि क्रव्यादोवापरोनीलःषण्मासायुःप्रदर्शकः १० हन्यतेकाकपंक्तिभिः
पांसुवर्षेणवानरः स्वांछायांचान्यथादृष्ट्वाचतुर्मासात्सजीवति ११ अनभ्रेवि·

कृतं दृष्ट्वा दासिणां दिशि माश्रितं यस्य सेंद्रधनुर्वापि जीवितं द्वित्रिमासिकं १२ हु·
तेनैवेलितयार्क्षयो यो नेलानानात्मनस्तनं यः पश्येद् दक्षिणे वक्रं वा मासार्धेन जीवति·
यस्य वक्त्रसमं योगं यो गात्रे शिवसमो पि वा नस्य मासादिकं तेयं योगिनः किल जी·
वति १४ यस्य वै स्नानमात्रस्य स्तोय मवशुष्यति पिवतस्य जलं शोषो दशाहं सोपि·
जीवति १५ यश्चापि हन्यते दैन्यैर्भूमिरात्राव थो दिवा सप्तरात्रं ततो तेन शमो तिन
संशयं १६ पिधाय कर्णौ विनिर्जेनम्प्राणमात्मसंभवं नशृणुते च नष्टघोषं ज्योतिर्यस्य।
सोपि न जीवति १७ रक्तकृष्णां बधरां गीतां हास्यपरां गीचयं दक्षिणाशांनयेन्ना।
री स्वप्ने सोपि न जीवति १८ नग्नं क्षपणकं स्वप्ने हसंतं नृत्यतापरं विलसंतं बलवा·
न्विद्यान्मृत्यु——मुपस्थितं १९ यन्नतोयस्य वेग नैःस्वप्ने द्वावेपि धीयते नचोत्तिष्ट·
ति यः स्वप्नान्तदंतं तस्य जीवितं २० स्वप्ने यस्य शवविशोषस्तु नवनिःक्रमते पुनः जला।
प्रवेशादपि वा तदंततस्य जीवितं २१ करालैः पुरुषैः कृष्णैर्विकटैरुद्यताशुधैः
पाषाणैः ताडितः स्वप्ने सद्यो मृत्युर्भवेन्नरः २२ दीपादिगंधं नो वेत्ति त्रस्यन्तस्तं निं।

तथा निशि नात्मानं परनेत्रस्थं वीक्षते यः स मृत्युमानु २३ स्वभाववैपरित्येप्रशरी
रस्य विपर्यये कान्यापत्तिर्मनुष्याणां समासन्नो यमांतिकं २४ आवक्रतामेति प्रवे·
जिका वक्त्र सितामभेवत् तदा ज्ञाता विजानीयान्मृत्युमासन्नमागतं २५ नासिका।
वक्रतामेति कर्णयोर्नमनोन्नतं वामं स्रवति यस्याक्षि तस्य मृत्युः सादिहोद्गतं यो·
गिनां ज्ञानविज्ञाणामन्येषां वा महात्मनां प्रासेन्न कालेपुरुषैस्तद्विवार्यं विचक्षणैः
प्रतेमार्कंडेयात् २६ इतिश्री·अरिष्टज्ञानं परिच्छेदः २५८ पूर्वाह्णे वापराह्णे वा ता·
घासार्घदिने क्वचित् यत्र वारं स्तनीभागेन दष्टिं नरीक्षितं १ तस्य भोगेन तथैवा·
को योगं युंजीत योगवित् विदेहमुक्तये ज्ञानी स्वकाम ब्रह्मणि अजं भयं २ पृथम बद्ध·
पद्मासनो धीमान्सम संस्थानकं धरः निरुद्धप्राणपवनो दंतैर्दंतान संस्पृशन् ३·
बुद्ध्या निरुद्धद्वाराणि न च मीलितलोचनः ओंकारं तु धनुः कृत्वा गुणं सत्वं नियोज
येत् ४ तत्रात्मानं शरं सोपि भूतात्मभूतेंद्रियादिभिः प्राणवायुः मनः क्षेपः हृत्सरो
त्कमलस्थितः ५ तथा महाब्रह्मार्गेण लक्ष्यं प्राप्यततः परं द्वात्रिंशत्तत्वसंयुक्तः पर

मात्मनिलीयते ६ ततः परममाकाशमतींद्रियमगोचरं यद्बुद्धैर्नैवव्याख्यातं शाक-
तेनतत्त्वमश्नुते ७ इतिविदेहमुक्तिकथनं अथकालवंचना जीवन्मुक्तः सदेहोहंवि
चरामिजगत्त्रयं इतिचेज्जायतेवांछायोगिनस्तन्निबोधने ८ शरीरेननयस्यैवकालः
कदापिकुत्रचित् ९ योगिनांसततंयत्नाद्दृष्टानांविचारणा अतः शरीरत्तार्थयु-
तःकार्यस्तुयोगिना कर्त्तव्यायेनकालोसौज्ञातोहंतिकुलानतं १० ज्ञात्वाकाल
वंचनंसम्यग्लयस्थानंसमाश्रितः युंजीतयोगंकालोस्ययथासौजायतेफलः ११·
यत्नसिद्धासनोदेहंपूरयेत्प्राणवायुना कृत्वादंडंस्थिरंबुद्ध्यादशद्वाराणिरुंधये-
त् १२ बंधयेत्वेचरीमुद्रांग्रीवायांवज्जलंधरं अपानेमूलबंधेचउड्डियानेतथोदरे
उत्थाप्यभुजगांशक्तिंमूलेद्धानेस्वधःस्थितां सुषुम्नामार्गगतांपंचचक्राणांभेदिनीं
शिवांजीवंसदाश्रयंकृत्वायातांबुद्धिमनोयुतां सहस्रदलपद्मस्थशिवलीनांस्व·
धामये १४ पीत्वासुधाकरोद्भूतममृतंतेनमूलतः सिंचंतीसकलंदेहंस्वावयं·
तीविचिंतयेत् १५ तयासार्धंततोयोगीशिवेनकात्मतांव्रजेत् परानंदमयोभू·

त्वामहन्तामपि संत्यजेत् १७ ततो लक्ष्यमनाभासमहंभावविवर्जितं सर्वांगकल्पना
हीनं कथं कालो निहन्ति तं १८ स एव कालः स शिवः स सर्वं नापि किंचन कः केन
हन्यते तत्र म्रियते नापि कस्मिन् १९ योगी स्वप्नोत्थित इव प्रबोधं याति बोधितः २० ।
एवं सिद्धो भवेद्योगी वंचयित्वा विधानतः कालं कलितसंसारं स्वरूपेणाश्नुते न हि २१
ततस्त्रिभुवने योगी विचरत्येक एव सः पश्यन्संसारवैचित्र्यं स्वेच्छया निरहंकृतिः
यथार्करश्मिसंयोगादर्ककान्तो हुताशनं आविष्करोत्यनायासा दृष्टान्तः स तु यो-
गिनः २४ पिंगला जगरः सर्पः सारंगान्वेषको वने इषुकारः कुमारी च षडेते
गुरवो मताः २५ गुरुभावविभावनाय मालोक्य तिलकाकृतिः सद्गुरुनेन विवर्ध-
ते योगी सिद्धिमुपाश्नुते २६ इति योगिनां कालवंचना ॐ नमः इति विरचितं व्या-
पद्धतिर्यामये सकलगुणगणानां श्रेयसे मास्तु नित्यं विपुलविमलदीप्यत्सत्क-
लानां निधानं तत्करुणानवाणि कृद्धाविदिषत्कौशिकानां १ तीर्थाब्धेः कमलेव को-
शवपदांकुयेवमायोर्गरवात् यद्वाणीस्तथाविधो विवनश्याबाणो रिवेयोतिता

शा
२८४
५८५

माकंदादिव मंजरीजलधराद्वर्षैव यातिर्गतामेयं शार्ङ्गधराद्धर्षैव यानिर्गतनोतज ।
गतस्ततोऽस्तुदपद्धतिः २ श्रमसार्थस्य शिष्याः सर्वज्ञाः स्यादिस्कृवस्याकृतबुद्धिः ग्रंथं
कामेवेति यं मे च मोहंतं निःसंदेहं शीलितं पंडितोऽपि ३ शास्त्राब्धिं सकलं विलोक्य
नितरां येन यः कृतो यं मया लोकानंदकरः समस्तसकलासंतानजैवान्वकः अस्मा
स्वाद्यस्तभाषितामृतरसानानंदसंपूर्णा नराः संतः संप्रति नाकवासनिरतान्देवानहं
मन्ये ध्रुवं ४ इति श्रीपंडितशार्ङ्गधरविरचितायां पद्धत्यां शांतरसे विदेहमुक्तिक
थने कालवंचनादिपरिच्छेदः समाप्तः ॥ शुभं कल्याणं ॥